अमर चित्र कथा

डॉ. बाबासाहेब आंबेडकरमहोदयः

संख्या १८८ रु. ८

SANS. 188



डॉ. बाबासाहेब आंबेडकरमहोदयाः

डॉ. बाबासाहेब भीमराय आंबेडकरमहोदयानां जन्म 'महार' इति शूद्रजातीय-कुटुंबे अभवत्। पददलितेषु 'महार' इति प्रमुखजातिः। अयं प्रमुखः समाजः अपि। तथापि बहुभिः, प्रायः सर्वैः एव स्पृश्यहिन्दुभिः तेषां जातीयानां विषये कदापि सहानुभूतिः न प्रदर्शिता, तथा आचरणंचापि तैः सह न साधितम्। मम जाति-समाजः अस्पृश्यः इति कृत्वा सः तुच्छतया गण्यते, दुराचारी च मन्यते। मम समाजस्य मानहानिः क्रियते, अतिशयः छलः च साध्यते इति एतत्सर्वं डॉ. बाबा-साहेब आंबेडकरमहाशयानां ध्याने बाल्यकाले एव आगतम्।

अस्माकं जातीयैः सह एतद् अन्यायकारकम् आचरणं दीनतया स्वीकर्तुं तैः नकारः दत्तः। स्वाधिकारविषये जागृतिं धृत्वा संमानेन जीवनं जीवितुं स्वसमाज-बान्धवैः संघर्षः कर्तव्यः इति ते मन्यन्ते स्म। स्वसमाजस्य न्यायस्थानप्राप्त्यर्थं स्वैः एव संघर्षः करणीयः। अन्यथा अन्येन केन अपि तत्स्थानं दानमिति कृत्वा तत् कदापि न दीयते इति ज्ञानं डॉ. बाबासाहेबमहोदयैः दलितसमाजाय प्रदत्तम्। तथा पददलितेषु तैः चैतन्यमपि निर्मितम्। ततः तेषां चैतन्यदायिनेतृत्वे एते अस्पृश्यजनाः संघटिताः अभवन्। स्वाधिकाराः प्राप्तव्याः भवन्ति ते कदापि न दीयन्ते इति डॉ. बाबासाहेबमहाशयैः प्रकर्षेण प्रतिपादितम्।


डॉ. आंबेडकरमहोदयैः अस्पृश्याः जनाः राजकीयदृष्ट्या जागृताः कृताः। अस्पृश्यतापालनम् इत्ययं विधिनियमानुसारम् अपराधः एवास्ति इति निर्णयग्रहणस्य महत्त्वं तैः ज्ञातम् आसीत्। अतः भारतीयसंविधाने अस्पृश्यतायाः उच्चाटनस्य समावेशः स्वाभाविकः एव। एते स्वयमपि भारतीयसंविधानस्य अन्यरचनाकारेषु अनन्यतमाः। शिल्पकाराः चैव। संविधानेनापि प्रदत्ताः अधिकाराः पददलितार्थं बहुभिः सवर्णहिन्दुभिः न्यक्कृताः। एतदर्थमेव डॉ. बाबासाहेबमहाभागैः स्वस्य अवशिष्टं जीवनम् एतस्मिन् कार्ये एव व्यापृतं कृतम्।


लेखकः - शान्ताराम शङ्कर रेगे


संस्कृतानुवादकः - पं. गुलाम दस्तगीर अब्बासअली बिराजदारः।
संस्कृतानुवादार्थं विश्वसंस्कृत - प्रतिष्ठानस्य प्रेरणा

भारतपुस्तक भवनम् मर्यादितम् इति संस्थायाः प्रकाशनम्।

Published by H. G. Mirchandani, for India Book House Pvt. Ltd, Mahalaxmi Chambers, 22 Bhulabhai Desai Road, Bombay - 400 026. and printed by him at Sakal Printers, Prabhadevi, Bombay - 400 025.
Editor : Anant Pai



डॉ. बाबासाहेब आंबेडकरमहोदयाः
रत्नागिरिमण्डलस्य आंबवडे ग्रामे रामजी सकपाल-महोदयाः सेनायां सुभेदारपदे आसन्। तेषां कटकः महु इत्यत्रासीत्। तेषां संन्यासी चुल्लतातः संयोगवशात्तत्रागतः। रामजी महोदयैः सह तस्य समागमः तत्र सहसैवाभवत्।
पितृव्य, मम गृहागमनस्य कृपा कर्तव्या।
मया संन्यासः गृहीतः, अतः आगन्तुम् असमर्थः
किन्तु रामजी इत्येषां खिन्नं मुखं दृष्ट्वा संन्यासिमन्नोऽद्रवत्।
तथापि मया तुभ्यम् आशीर्वादः दीयते यत् दिगन्त-कीर्तिमान् भवेदिति सुपुत्र-लाभः तव भवतु इति।


१४ एप्रिल १८९१ ख्रिस्ताब्दे रामजी-पत्नी भीमाबाई इत्यनया पुत्रः प्रसूतः ।
अस्य नामधेयं भीमः इति कार्यम्। इदं महाकीर्तियोग्यं बालकं भूषयति। प्रसङ्गे आवयोः उपवासः अपि। किन्तु अस्य कृते कापि न्यूनता न क्रियेत।
अधुनाहं सुभेदार-मेजर इति अधिकारी। तस्मै सम्यक् शिक्षणं दातुम् आवयोः उपवासः अपि न भवेत्।
वर्षद्वयानन्तरं रामजीमहोदयाः सेनातः निवृत्ताः। कोंकणस्थ-दापोलीग्रामे तैः स्वकुटुंबं निवासितम्। भीमः पञ्चवर्षीयः जातः। पाठशालायां तस्य नामांकनं जातम्।
भवतां निवृत्तिवेतनमल्पम्। तस्य शिक्षणव्ययः कथम् अस्माभिः सहनीयः?
कापि चिन्ता न कार्या। सर्वं सम्यक् भवेत्। कैश्चित् मित्रैः भृत्यत्वं मह्यं दास्यते। तथा आश्वासनं तैः दत्तम्।
अविलंबेनैव रामजीमहोदयैः सातारा इत्यत्र भृत्यत्वं प्राप्तम्। आशाः पुनश्च वृद्धिं गताः। परन्तु तदैव कतिपयदिनानन्तरं रुग्णा भीमाबाई दिवं गता। कुटुंबे वज्राघातः एव।
जननीं विना मम अनाथबालकाना कथं भवेत्?
बन्धो, चिन्ता न कार्या। अहं तान् पश्यामि। कनिष्ठभीमस्य तु विशेषां चिन्तां वहामि।
रामजी भगिनी मीराबाई बालानां भरण-पोषणम् अकरोत्।



सेनायामध्यापनं कृतैः रामजी महोदयैः अधुना स्वबालकानां शिक्षणार्थं ध्यानं दीयते स्म।
रामायण-महाभारतस्थाः कथाः पवित्वा बालान् श्रावयति स्म। देवभक्तिगीतानि, अभंगगानानि च तान् पावयति स्म।
भीमस्य प्राथमिकशिक्षणं पूर्णं जातम्। तेन माध्यमिकशालायां प्रवेशः कृतः। तत्र अन्यच्छात्रतः दूरे एकस्मिन् कोणे तम् उपवेशयति स्म।
भीमराय आंबेडकर!
उपस्थितः आचार्याः।
मध्यविरामकाले घण्टा-नादिते सर्वे छात्राः क्रीडितुं जलं च पातुं वर्गाद् बहिः धावन्ति स्म। तृषार्तः भीमः जलपात्रं गृहीतुं गतः तदा-
रे रे जलपात्रं मा स्पृश।




हस्तांजलिं कुरु। अहं जलं निसिञ्चामि।
भीमेन हस्ताञ्जलिं कृत्वा मूकत्वेन जलपानं कृतम्। एषा घटना तस्य मनः पीडयति।
मम का न्यूनता? एवं भेदाचरणं मम विषये एव कथम्?
एकदा भीमः तस्य ज्येष्ठबन्धुना सह कोरेगाव इत्यत्र भृत्यत्वार्थं निवसतः स्वपितादर्शनार्थं प्रस्थित.। मसूरस्थानके अवतीर्य पिताप्रतीक्षायां स्थितौ।
तातचरणाः कथं नागताः?
सुदीर्घकालप्रतीक्षान्ते रेलस्थानक प्रमुखस्य सहायेन ताभ्यां वृषभशकटमेकं निश्चितम्।
कस्य पुत्रौ रे युवाम्?
आवां रामजी सकपालस्य पुत्रौ तेषां दर्शनार्थं प्रस्थितौ।


रामजी सकपालस्य ? अन्त्यजौ, शकटात् अधः अवतरतम्।
दयां कुरुत आवां मा अवतारयत।
कोरेगाव इत्यत्र कथं गन्तव्यमिति आवयोः ज्ञानं नास्ति। मार्गभ्रष्टौ भवावः
अहं भ्रष्टः कारितः, मम शकटः अपवित्रः कृतः वृषभौ च अपवित्रौ कृतौ युवाभ्याम्।
द्विगुणितं भाटकं दास्यावः। कृपां कुरुत, आवां कोरेग्रामं नयत।
आवयोः वस्त्राणि सुन्दराणि स्वच्छानि च। ततः आवयोः स्पर्शनेन शकटः कथम् अपवित्रः भवति ?
अन्ते धनलोभेन शकटचालकस्य चित्तस्थ-अपवित्रतायाः भयं विजितम्।
बाढम्! चलतु नु। युवां शकटं चालयतम्, अहमनुचलामि। ततः वृषभ-शकटादि शुद्धं करोमि।
संपूर्णे प्रवासे तत्प्रसङ्गविषये भीमः चिन्तयति स्म।
वयं मानवाः। तथापि अस्माकं स्पर्शनेन निर्जीव-शकटः पशवः च अशुद्धाः भवन्ति इति वदन्ति। एतत् किमर्थं कथं च।


भीमः वयसा नाधिकः। अतः अस्याः घटनायाः विस्मरणस्यापि संभवः परन्तु सातारा इत्यत्र आगमनान्ते कतिपयदिनान्ते विद्यालयतः प्रत्यागमनकाले पुनश्चैका घटना घटिता।
तृषया अतिकण्ठशोषः। अस्याः वापिकायाः जलं पिबामि।
पश्यत, हर हर, तम्-स्पृश्यं पश्यत।
तेन अस्माकं जलं अशुद्धं कृतम्।
अत्रान्तरे -
मुञ्चत, मुञ्चत माम्! अपराधः कः मम!
नीच, त्वम् उद्धततया पुनरपि वदसि?
भीमः अतिदुःखेन रोदिति।
अग्रे वर्धमानेनानेन बहुवारं नानाविधाः अपमानाः सोढाः।
भीम, तव केशाः अतिदीर्घाः जाताः। तव केशकर्तनं करोमि।
मम शालायाः अन्यच्छात्र-वत् नाभिकद्वारा कथं न कर्त्यन्ते?


भगिन्याः नेत्राभ्याम् अश्रूणि प्रावहन्।
वयं महाराः इति अस्पृश्याः स्मः।
परन्तु वयं भिन्नाः कथम्?
अहं न जाने। एवमेव चलति अद्यापि।
भगिन्याः उत्तरेणानेन भीमस्य समाधानं नाभवत्।
दयाशीलः ब्राह्मणाध्यापकः आंबेडकरः इति भीमस्य आशास्थानम् आसीत्।
केवलं ते एव मम सामीप्यं स्थापयन्ति।
साधु, साधु, सर्वगणितानि निर्दोषतया त्वया कृतानि।
अपराह्णे, मध्यविरामकाले–
अत्रागच्छ भीम, उपविश, मया सह भोजनं कुरु।
परन्तु, गुरुवर्याः–
तवाध्यापकेन सह त्वं किं नोपविशसि? उपविश। आवां भोजनं सहैव कुर्वः।



एकदा एवमेव तौ प्रातराशं कुर्वन्तौ –
भीम, तव आंबडवेकर इति कुलनाम अहम् आंबेडकरः इति करोमि।
गुरुवर्याः, यथेच्छा भवताम्।
एकदा रात्रौ मीरा इति पितृभगिनी बालान् आह्वयति।
बालाः, नातिविलंबेन युष्माकं एका नवा माता आगच्छति। तातः पुनर्विवाहं कर्तुं निश्चितवान्।
कथं? नहि नहि!
सा मम मातुः अलङ्कारान् वसनानि च धारयति। तस्याः च संसारं चालयति। छद् छद्, कदापि नहि। अहमत्र नैव तिष्ठामि।
अहं मुंबई निर्गच्छामि। भृत्यत्वं च करोमि। परन्तु तत्र गमनार्थं धनं कुतः? अहं पितृभगिनीं पृच्छामि।
तथा तेन पृच्छा कृता। ततः तया स्वसञ्चिका प्रदर्शिता। सा रिक्ता एव –
रे, रे, अतिदुःखदं, किमपि धनं नास्ति।


जिज्ञासया पृच्छा कृता आसीत् –
परन्तु पृच्छा व्यर्था जाता। अनया मम पितृभगिन्याः दैन्यमेव प्रकाशितम्। महद्दुःखदमेव।
भीमेन रिक्ता सञ्चिका दृष्टा ततः सः सुप्तः।
शय्यायाम् उपविश्य भीमः प्रार्थयते– देव, कियदेतद् दैन्यम्। तथापि एतद् जीवनम्। अतः मया अधिकः अभ्यासः कर्तव्यः। ततः दैन्यमेतद् विनश्येत्।
ततः भीमः अभ्यासमग्नः जातः अध्यापकद्वारा च साधुवादः प्राप्तः तेन।
रामजी महोदयाः, भवतां बालकः अतीवकुशलः। अस्य सम्यक् शिक्षणेन सार्थकता एव भवेत्!
गुरुवर्याः, तथाहम् अवश्यं प्रयते।
ततः परिवारेण सह रामजी महोदयाः मुंबईमागताः। 'परळ' इति कर्मकरवसत्याः चाल्यां कक्षा गृहीता। स्वयंपाकः निद्राशय्या– अभ्यासादिसर्वं तत्रैव।
भीम, एतस्मिन् कोलाहले संक्षोभे च तव अभ्यासः न भवति, अधुना त्वं स्वपीहि। रात्रौ द्विवादने अभ्यासार्थमहमुत्थापयामि त्वाम्।
अस्तु



भीमः भूमितले सुप्तः ।
रात्रौ द्विवादने –
भीम, जागरणसमयः जातः ।
सर्वेषां निद्रासमये भीमः अभ्यासं करोति ।
एकदिवसे मुंबईस्थे एल्फिन्स्टन विद्यालये –
भीम, अत्र फलकं प्रति आगच्छ ।


अत्र महानगरे अपि जातीयता प्रचलिता आसीत्।
आचार्याः, तं विरमयत्त। सः अस्पृश्यः अस्ति।
अरे रे! अस्माकं समाप्तिः जाता।
फलक-पृष्ठे भोजन-साहित्यं अस्माकं अस्ति। सः तानि अशुद्धानि करिष्यति।
पुनः एकदा-
आचार्याः, द्वितीयभाषा इति संस्कृतं पठितुकामः अहम्।
तत् शक्यं नास्ति। अस्पृश्यार्थं संस्कृतं नास्ति। त्वं पर्शियनभाषां पठितुं शक्नोषि।
एवं सर्वापमानान् सोढ्वा अपि भीमेन महत्प्रयत्नेनाभ्यासः कृतः। चर्नीरोडस्थे उद्याने सः गच्छति स्म। तत्र अनेकदा विद्वान् समाजसुधारकः केळूस्कर गुरुवर्याणां दर्शनं भवति स्म।
भीमराय, तव अभ्यासः कथं चलति?
गुरुवर्याः, प्रकामं करोमि।
मॅट्रिकपरीक्षायां सुयशः प्राप्तवान् अयम् अस्पृश्यजातीयः प्रथमः बालकः। अतः तस्य गौरवार्थं समाजेन सभा आहूता। केळूस्करगुरुवर्याणामपि गौरवसमारोहे सहभागः। सुप्रसिद्धः समाजसुधारकः श्री. के. बोले अध्यक्षस्थाने आसीत्।
ममाशीर्वादस्य प्रतीकरूपेण बुद्धचरित-विषये मम पुस्तकोपहारं तुभ्यम् अहं ददामि।


सभानन्तरम्-
रामजीमहोदयाः भवतां बुद्धिशालिपुत्रविषये अग्रे किं करिष्यथ?
केळुस्करमहाशयाः, प्रथमं तस्य विवाहः कार्यः इति अस्माकं विचारः।
तस्मिन् काले बालविवाहः रूढः आसीत्।
परन्तु तस्य शिक्षणस्य अग्रे किम्?
किमपि भवतु मया सः अग्रे अपि पाठनीयः एव।
भीम-रमाबाई इत्यनयोः विवाहः संपन्नः।
अतिधनाभावः आसीत्। तथापि रामजीमहोदयैः हस्तगतधनाधारेण तस्य शिक्षणव्ययः स्वीकृतः। भीमः तु पदवीप्रवेशपरीक्षोत्तीर्णः तदा...
तातमहोदयाः, अद्यापि महाविद्यालयस्य शुल्कं भवद्भिः न दत्तम्।
तातमहोदयाः, किं कर्तव्यम्? पूर्वं द्विवारं शुल्कपूर्तिविषये मह्यं सूचना दत्ता। अद्य शुल्केन विना महाविद्यालयं न गमिष्यामि।
वत्स, मम हस्ते धनं नास्ति।



एतस्यामवस्थायां दयालुवृत्ति-केलुस्करगुरुवर्याणां स्मरणमभवत्। रामजीमहोदयाः तत्र गताः। केलुस्करमहोदयैः तत्काले उपायः सूचितः।
रामजीमहोदयाः, कापि चिन्ता न कार्या भीमरायः बडोदा-नरेशं सयाजीराय-गायकवाडं प्रति मया नीयते। मम विश्वासः, तथा सः साहाय्यं करिष्यति।
त्वरितं च–
तातमहोदयाः गायकवाड-महाराजैः पञ्चविंशतिरूप्यकाणां मासिकी शिष्यवृत्तिः मह्यं प्रदत्ता। अधुना अग्रे भवतां चिन्ताकारणमेव नास्ति।
साधु, साधु! मया केलुस्कर-महोदयेभ्यः आभारदानं कर्तव्यम्।
भीमरायाः १९१२ ख्रिस्ताब्दे बी.ए. परीक्षोत्तीर्णाः।
बडोदासंस्थाने मह्यं शासकीयसेवाकार्यं दीयते। परन्तु वेतनम् अत्यल्पम्।
भीमरायाः बडोदां गत्वा पञ्चदशदिवसाः व्यतीताः। तदा एका अशुभा वार्ता आगता।
तातचरणाः अत्यवस्थाः। शीघ्रमायान्तु।
भीमरायाः मुंबई प्रत्यागताः। २ फेब्रूवारी १९१३ दिने तातचरणाः दिवंगताः, तदा ते तेषां समीपे आसन्।
तातचरणाः वयम् अनाथाः। अधुना विचारविमर्शः कस्य संमुखे अस्माभिः कर्तव्यः?
परन्तु रामजीमहोदयैः स्वपुत्रस्य भाविकर्तृत्वस्य मूलभूताधारः रचितः आसीत्।



भीमरायाः पुनः केलुस्करान् प्रति मार्गदर्शनाय गताः।
अहं मन्ये, बडोदामहाराजान् भवन्तः पश्यन्तु! विदेशविद्याभ्यासार्थं केचित् छात्राः प्रेषणीयाः इति तेषां संस्थानस्य योजना वर्तते।
त्वरितमेव-
अद्यैवाहं बडोदातः आगतः। तैरहं संमतः। किन्तु विद्याभ्यासपूर्णान्ते दशवर्षपर्यन्तं बडोदासंस्थाने मया सेवा करणीयेति समयः स्वीकार्यः अभवत्।
१९१३ ख्रिस्ताब्दे जुलैमासे भीमरायाः न्यूयार्कं प्राप्ताः।
अत्र मम कृते सर्वं मुक्तमेव दृश्यते। मदर्थमत्र किमपि समाजबन्धनं नास्ति। मनोनुकूलं सर्वं कर्तुं शक्नोमि।
अमेरिकादेशे स्वातन्त्र्यस्य, समतायाः च अनुभवः भीमरायाणां कृते अपूर्वः एव आसीत्।
प्रतिदिनं प्रायः अष्टादशहोराः विद्यार्जने व्यतीताः भवन्ति स्म।
१९१५ ख्रिस्ताब्दे तैः एम्.ए. पदवी प्राप्ता। अग्रिमे चैव वर्षे पी.एच.डी. अपि प्राप्ता।
नियोजितसमयापेक्षया न्यूनसमये एव अमेरिकाविद्याभ्यासः पूर्णः कृतः। ततः भीमरायाः लंडनं गताः।
मया विधिपदवी प्राप्तव्या। तथैव च अर्थशास्त्रस्य अग्रिमः अभ्यासोपि कर्तव्यः।


परन्तु बडोदा-अमात्येन भारतं प्रत्यागमनार्थं भीमराया: सूचिता:। तथा ते बडोदां प्रत्यागता:।
तथा रेलयानस्थानके क: अपि शासकीयाधिकारी तेषां स्वागतार्थं न उपस्थित: आसीत्।
बडोदे
निवासस्थानार्थं ते सर्व-निवासगृहाणि गता:। परन्तु कुत्रापि तै: निवासस्थानं नाधिगतम्।
भवन्त: एव ते नवा: अधिकारिण: नु? क्षम्यताम् अस्पृश्यार्थमत्र स्थानं नास्ति।
अन्ते कस्मिंश्चित् पारसिक-वसतिगृहे स्थानं प्राप्तम्। किन्तु तदपि नाम परिवर्त्य अज्ञातरूपं स्वीकरणान्ते एव।
अन्येद्यु: ते कार्यालयं गतवन्त:, तदा अपावित्र्यं मा भवतु इति कृत्वा कर्मचारिणा भूम्यास्तरणं परिवेष्ट्य स्थापितमासीत्।




कार्यालये तेषामासनम् एकस्मिन् कोणे मण्डितमासीत्। धारिकादानार्थमपि कर्मचारी तेषां समीपे न गच्छन्ति स्म।
ग्रहाण इमां धारिकाम्।
वसतिगृहस्य पारसीजनैः एते के इत्यवगताः यथार्थतया, तदा...
भवान् कः अस्ति?
अहं हिन्दुः अस्मि।
नैव नैव च। भवान् एकः नीचः 'महार' इति अस्पृश्यः।
निर्गच्छतु इतः।
अहं गच्छामि, परं कश्चित् अवधिः देयः।
क्षणमेकमपि नहि! अधुनैव निर्गच्छतु।
आंबेडकराः निवासहीनाः जाताः। नगरे केनापि तेभ्यः आश्रयः न दीयते स्म।
यत्र संमानेन मम निवासः न भवेत् तत्र अहं नैव निवसामि।


एवमेव ते सन्त्रस्ताः। ततः बडोदां त्यक्त्वा ते मुंबईम् आगताः। धनादेशपत्रविषये परामर्शदानार्थं संस्था तैः प्रचालिता। परन्तु तत्रापि...
आंबेडकरतः परामर्शः गृह्यते ?
हुं! ते तज्ज्ञाः सन्ति।
ते अस्पृश्याः सन्तीति भवतां ज्ञाने नास्ति ?
अस्पृश्याः ? ततः इतः परं तान् प्रति अहं न गच्छामि।
सा संस्था प्रतिबद्धा कारिता जाता।
नोव्हेंबर १९१८ ख्रिस्ताब्दे सिडनहॅमममहाविद्यालये प्राध्यापकपदं तैः प्राप्तम्।
अस्माकं महाविद्यालये ते सर्वोत्कृष्टाः प्राध्यापकाः सन्ति।
अथ किम् ? ते नूनमेव विशेषज्ञाः विद्वांसः सन्ति।
यथायोग्यं वेतनं प्राप्यापि ते मितव्ययेन जीवन्ति स्म।
गृहव्ययार्थं धनमधिकं दातुं न शक्नोमीति मे दुःखम्। अभ्यासं पूर्णं कर्तुं लंडनं प्रति गमनाय मया धनं संग्रहणीयम्।
चिन्ता न कर्तव्या। अहं कथमपि चालयामि।
आंबेडकराणामभ्यासे व्यत्ययः मा भवतु इति कृत्वा कर्तव्यदक्षा रमाबाई ध्यायति स्म।
नहि, नहि! शिशुः यशवन्तः रुग्णः अस्ति इत्यपि तेभ्यः नैव कथयामि। ते शान्ततया अभ्यासं कुर्वन्तु।


वर्षद्वयानन्तरम्-
रमे, कोल्हापूरमहाराजाः मह्यं सहाय्यं दातुकामाः। मम नवलभाटे-मित्राय प्रत्यर्पणरीत्या धनं दातुमेषः सिद्धः। अतः अधुनाहं लंडनं गन्तुं शक्नोमि।
साधु साधु जातम्।
लंडनं गमनान्ते आंबेडकरैः पुनरपि अर्थशास्त्राभ्यासः समारब्धः। तथैव च तेनैव सह ग्रेज इन्मध्ये बॅरिस्टर पदव्यर्थं सत्रपूरणारंभः अपि कृतः। अभ्यासार्थम् आवश्यक पुस्तकानि क्रेतुं तेषां समीपे धनं नासीत्।
ब्रिटिशग्रन्थालये प्रातः-कालतः सन्ध्याकालपर्यन्तम् उपविश्य मया अभ्यासः कर्तव्यः।
भोजनालये मध्याह्नभोजनग्रहणं धनाभावे शक्यं नासीत्। अतः ग्रंथालयं गमनसमये अल्पाहारं गृहीत्वा गच्छन्ति उपवेशनस्थाने च मध्याह्ने खादति स्म। एकदिने-
ग्रन्थपालैः भवन्तः कार्यालये आहूताः।
ग्रन्थालये खाद्यान्नम् आनीय भवद्भिः नियमभंगः कृतः। अतः भवन्तः सपद्येव ग्रन्थालयतः बहिर्गच्छन्तु ननु।
ममोपरि कृपा कर्तव्या। सांप्रतं क्षन्तव्यः। पुनरेवं नाहं करिष्यामि।



प्रतिदिनं प्रातःकालतः संध्याकालपर्यन्तं भवन्तः पठन्तः एव दृश्यन्ते। अन्यजनवत् भवद्भिः मध्याह्नभोजनार्थं किमर्थं विरामः न गृह्यते?
मध्याह्नभोजनव्ययः मम धनावस्थानुसारं न सह्यते। प्रातः अल्पाहारतः मया कश्चिदंशः संरक्ष्यते। सः एव अत्र पानपात्रमात्रजलेन सह भक्ष्यते च।
अस्य कठोरानुशासित-ज्ञानप्रेमि-युवकछात्रस्य करुणां स्थितिं श्रुत्वा ग्रन्थपालस्य मनः द्रवति।
बाढम्, अधुना भवन्तः क्षम्यन्ते। परन्तु एकः समयः अस्ति यत् भवद्भिः मया सह एतस्मिन् कोष्ठे मध्याह्नभोजनं कर्तव्यमिति।
तेन आंग्लेन कृता सूचना डॉ. आंबेडकरैः कृतज्ञतया संमता।
१९२३ ख्रिस्ताब्दे ते अर्थशास्त्रज्ञाः बॅरिस्टराः चेति भूत्वा भारतं प्रत्यागताः। किन्तु -
मम पदव्यः अर्थहीनाः संभूताः मम विधिज्ञत्वकार्ये अपि मम अस्पृश्यता बाधाम् आनयति। मम समाजोद्धारार्थं मया प्रयत्नाः कर्तव्याः
कतिपयदिनानन्तरं शासनादेशः प्रसृतः जातः यत् शासनसहाय्यं प्राप्नुवन्तीषु संस्थासु अस्पृश्यानां कृते प्रवेशः न निषेधनीयः।
इदं तस्य महार-आंबेडकरस्यैव कार्यं स्यात्।
तस्मै दोषदाने कः अर्थः? अस्माकमेव श्री: के. बोलेमहोदयैः एतद्विधेयकं मण्डितमासीत्।
उपहार गृह


डॉ. आंबेडकरैः बहिष्कृत-हितकारिणी-सभां संस्थाप्य तद्द्वारा वसतिगृहाणि, विद्यालयाः, विनामूल्येन वाचनालयाः च समारब्धाः। एकदिने-
मुंबई विधानपरिषदि भवतां नियुक्तिः। मम विश्वासः यत् तन्नियुक्तेः उपयोगः भवद्भिः क्रियेत।
अस्पृश्यानां भवितव्य-सुधारणार्थं यथाशक्यं तत्सर्वं मया क्रियते।
१९ मार्च १९२७ दिनाङ्के महाड इत्यत्र दलितसमाजस्य परिषद् अभवत्। तस्याः अध्यक्षपदे अधुना सर्वपरिचिताः बाबासाहेबनामा डॉ. आंबेडकराः आसन्।
मनःस्थाः उच्चनीचतायाः सर्वाः कल्पनाः समूलतया नाशतां नयन-समयः समागतः अधुना। यदा वयं स्वावलंबनस्य शिक्षणं गृहित्वा स्वाभिमानं प्राप्नुयाम तदैव अस्माकम् उद्धारः भवेत्।
स्वातन्त्र्यस्य दानं न क्रियते। तदर्थं संघर्षः कर्तव्यः एव। चतुर्वर्षेभ्यः पूर्वं महाड-नगरपालिकया रुचिकरतडागः सर्वेषां कृते मुक्तः कृतः। परन्तु अस्मासु केनापि अद्यापि तत्रस्थं जलं न गृहीतम्। अद्य वयं तद् गृह्णीमः।


डॉ. आंबेडकरा: स्वानुयायिभि: सह रुचिकरजलाशयं गता:।
अपि जलाशयत: जलं गृह्यते? तदर्थम् अस्माकं धैर्यं भवेत् वा?
बाबासाहेबा: किं करिष्यन्ति तत्पश्याम:।
तडागं गत्वा डॉ. आंबेडकरै: अंजलौ जलं गृहीतम्।
तच्च तै: पीतमपि।
कृत्वा एव प्रदर्शितं तै:।
अपूर्वा एषा परिणामकारिणी घटना अभवत्। डॉ. आंबेडकरै: स्वानुयायिनां मन:स्थ-भय-पिशाच्चानां निष्कासनं साधितम्। तत: तत्रस्थै: सहस्त्रश: जनै: तस्य सार्वजनिकतडागजलस्य प्राशनं कृतम्। एक: विशेष: च इतिहास: तै: घाटित:।



दलितानां समूहः इतस्ततः जातः। तदा उच्चवर्णीयैः एका सभा गृहीता।
अस्माकं तडागः भ्रष्टः जातः।
ते ताडनीयाः एव। अनेन च पाठनीयाः।
हस्ते पाषाणं धृत्वा सवर्ण-हिन्दवः सभास्थाने समागताः। बहवः प्रतिनिधयः ततः पूर्वमेव निर्गताः आसन्।
ताडयत तान्
कमपि न मुंचन्तु।
ततः तेषामनुयायिनः बाबासाहेबान् प्रति प्रार्थयन् तदा–
अत्याचाराः अनिर्बद्धाः चलन्ति।
महोदयाः अनुज्ञा देया। वयं तेषां निर्णयं करवाम।
नहि नहि! उद्रेकः नैव उपयुक्तः। अस्माभिः किमपि अवैधं नैव क्रियेत। वयं शान्ततया आन्दोलनं कुर्मः इति आश्वासनं मया दत्तं वर्तते।
मम कथनानुसारमेव मम जनाः समाचरन्ति इति वचनम् आंबेडकरैः आरक्षकेभ्यः दत्तम् आसीत्। तैः रक्तपातः परिहृतः।


नूतनेनैव समारब्धे स्वस्वं 'बहिष्कृत भारत' इति पत्रे 3 मार्च 1930 दिनाङ्के नाशिकस्य - कालाराममन्दिर-प्रवेशार्थं सत्याग्रहस्य घोषणा तैः कृता। तथा तेषामनुयायिभिः मन्दिरप्रवेशद्वारे सत्याग्रहः च समारब्धः।
श्रीकाला राम मंदिर पंचवटी
मन्दिरस्य वार्षिक रथोत्सवस्य एकदिनपूर्वपर्यन्तं प्रायः एकमासपर्यन्तमयं सत्याग्रहः प्राचलत्।
तथा भवतु। उभयपक्षयोः मल्लाः रथं समाकृष्य नयन्ति।
तथा स्यात्तदा अयं सत्याग्रहः अस्माभिः स्थगितः क्रियते।
परन्तु तैः डॉ. आंबेडकरानुयायिनः वञ्चिताः। तेषां समक्षमेव ते रथं समाकृष्य अनयन्।
अस्माकमुपरि पाषाणप्रक्षेपणं ते कुर्वन्ति।
कुर्वन्तु ते। वयम् अविचलाः भवामः।
डॉ. आंबेडकरानुयायिभिः तथैव सत्याग्रहः प्रचालितः कृतः। मन्दिरं प्रायः एकवर्षपर्यन्तम् अनुद्घाटितमासीत्।


एतस्मिन् अवसरे महात्म-गान्धिनां नेतृत्वे स्वातन्त्र्यान्दोलनस्य गतिः प्रवृद्धा आसीत्। १९३० ख्रिस्ताब्दे आंग्लशासनेन भारतस्य संविधाननिर्माणार्थं लंडननगरे गोलाकारपरिषद् आकारिता। तदर्थं दलित प्रतिनिधिरूपेण डॉ. आंबेडकराः समुपस्थिताः।
आंग्लराजसत्ता निर्गच्छतु। तत्स्थाने भारतीय-लोकशासनाधिष्ठितं कर्तव्यमिति प्रार्थनार्थं दलितवर्गस्यापि पुरस्करणं वर्तते। अस्माकमुपरि जाताः अन्यायाः शल्यवत् अक्षि-घ्नन्ति। तथापि सार्धैकशतवर्षाणाम् आंग्लशासनेन तद्विषये कः अपि उपायः न कृतः। ततः एतादृशी सत्ता केन अपेक्ष्यते?
ततः पुनरपि गोलाकारपरिषद् समाहूता आसीत्। प्रथमा परिषद् महात्म-गान्धिभिः बहिष्कृता। द्वितीयपरिषदर्थं महात्म-गान्धिभिः कॉंग्रेसपक्षस्य प्रातिनिधित्वकरणं स्वीकृतमासीत्। लंडनं प्रस्थानपूर्वं डॉ. आंबेडकराः तेषां दर्शनार्थं गताः।
प्रथमगोलाकृतिपरिषदि भवतां भाषणस्य वृत्तान्तः मम कर्णपथम् आगतः। तेन भवन्तः यथार्थाः देशभक्ताः इति मम ज्ञाने आगतम्।
लंडननगरे द्वितीयगोलाकारपरिषदि-
भारतीय दलितसमाजार्थं स्वतन्त्रमतदातृसंघः मया प्रार्थ्यते। हिन्दुधर्मेण अस्मभ्यं केवलं दारिद्र्यम्, अपमानः मानहानिः च दत्ता वर्तते।



परिषद् अनिर्णीतावस्थायामेव समाप्ता। परन्तु अस्पृश्यानां करुणा स्थितिः यैः जगतः दृष्टिपथम् आनीता इति तेषां डॉ.आंबेडकराणां धैर्यस्य मुंबई प्रत्यागमनान्ते महत् कौतुकमभवत्।
आंबेडकराणां जयः भवतु।
मां देवं मा मन्यध्वम् इति विज्ञापना।
डॉ. आंबेडकराणां पत्नी अतिधर्मशीला आसीत्।
अस्माभिः पण्ढरपुरं गन्तव्यम्। विठोबादर्शनग्रहणस्य मम तीव्रा इच्छा अस्ति।
किन्तु रमे, अस्माकं प्रवेशः मन्दिरे न भविष्यति।
कः अपि प्रत्यवायः नास्ति। मन्दिराद् बहिरेव स्थित्वा विठोबादर्शनं ग्राह्यम्।
धिक्। तथा मया नैव संमन्यते।
तैः स्वपत्नी अवगता कारिता।
यत्र वयं केवलः दूरं स्थाप्यामहे तस्य पण्ढरपुरस्य भवत्या कथं चिन्ता क्रियते? सदाचारिजीवनं, निःस्वार्थसेवाभावः पददलितसमाजस्य हितार्थं कृतः निष्कलंकः त्यागः चेति एतैः माध्यमैः वयं नवपण्ढरपुरस्य निर्माणं करवाम।



तेषां गृहं यथार्थमेव अस्पृश्यानां पण्ढरपुरम् अभवत्। डॉ॰ आंबेडकराः तेषां मुक्तिदातारः एव तैः अमन्यन्त।
बाबामहोदयाः शासनेन अस्माकं स्वतन्त्र-मतदातृसंघः कृतः अस्मभ्यं च सः दत्तः।
साधु! अस्माभिः प्रथमं परिवर्तनं जितम्।
परन्तु म॰ गान्धिमहोदयाः जात्याधारेण निर्मित-मतदातृसंघस्य रेखाङ्कनविरोधे आसन्। ते तदा येरवडाकारागृहे बद्धाः आसन्। निषेधदर्शनार्थं तैः तत्र उपोषणं समारब्धम्। मुंबई इत्यत्र एकसभायाम् –
डॉ॰ महोदयाः, भवद्भिः एव महात्म-गान्धिनां प्राणरक्षणं कर्तुं शक्यते। कृपया तेषां कथनं मन्तव्यमिति।
डॉ॰ आंबेडकरमहोदयैः स्वभूमिका स्पष्टीकृता।
यद्यपि भवद्भिः महां समीपस्थदीपस्तंभे समारोप्य वधदण्डः दीयते तथापि मम बान्धवानां नियमबद्धाधिकारविषये मया अप्रामाणिकता नैव क्रियते।
ततः तैः येरवाडाकारागृहे म॰ गान्धिदर्शनं गृहीतम्।
वयं सर्वे अविभक्ततया एकतया च जीवाम। स्वेच्छया भूतकालीन-पापक्षालनार्थं हिन्दुधर्माय अन्तिमसन्धिः देयः।
अहं विचारं कृत्वा कथयामि।



एतस्मिन् महत्समस्याप्रसंगे मार्गः न दृश्यते स्म। अन्ते विभक्तमतदातृसंघस्थाने अस्पृश्यानां कृते अधिकं प्रतिनिधित्वं देयमिति सन्धियुक्तस्वीकरणे स्वाक्षरीदानार्थं डॉ. आंबेडकरैः मान्यता प्रदर्शिता।
जातितत्त्वानुसारं जनानां भूयमानविभाजनम् अन्ते परिहृतम्।
राजकारणे क्रियाशीलः अपि तेषां विद्याव्यासंगः अचलदेव। तेषामपूर्वग्रन्थागारे तैः पञ्चसहस्रतः अधिक-ग्रन्थानां संग्रहः कृतः। एतदर्थं उत्तर मुंबई दादर इत्यत्र तैः सुयोग्यबृहद्गृहं रचितम्। तस्याधुना राजगृहमिति नामधेयं कृतं वर्तते।
१९३५ ख्रिस्ताब्दे मे मासे आंबेडकराणां जीवने एका दुःखदा घटना घटिता। तेषां प्रियपत्नी रमाबाई दिवं गता।
मध्यकाले पुणेसन्धिः केवलं कागजोपरि स्थितः इति ज्ञात्वा डॉ. आंबेडकराः व्यथिताः जाताः। येवले इत्यत्र अस्पृश्यानां समाहूतपरिषदि –
मानवतायाः सरलाः अधिकाराः अपि अस्माभिः नाधिगताः। अहं हिन्दुः इति जन्म गृहीतवान्। नायं ममापराधः। मरणसमये तु अहं हिन्दुः इति स्थित्वा न म्रिये इत्येतदेव मया सुनिश्चयेन कथ्यते भवद्भ्यः।



तेषां गृहं यथार्थमेव अस्पृश्यानां पञ्जरपुरम् अभवत्। डॉ॰ आंबेडकराः तेषां मुक्तिदातारः एव तैः अमन्यन्त।
बाबामहोदयाः शासनेन अस्माकं स्वतन्त्र-मतदातृसंघः कृतः अस्मभ्यं च सः दत्तः।
साधु! अस्माभिः प्रथमं परिवर्तनं जितम्।
परन्तु म॰ गान्धिमहोदयाः जात्याधारेण निर्मित-मतदातृसंघस्य रेखाङ्कनविरोधे आसन्। ते तदा येरवडाकारागृहे बद्धाः आसन्। निषेधदर्शनार्थं तैः तत्र उपोषणं समारब्धम्। मुंबई इत्यत्र एकसभायाम् –
डॉ॰ महोदयाः, भवद्भिः एव महात्म-गान्धिनां प्राणरक्षणं कर्तुं शक्यते। कृपया तेषां कथनं मन्तव्यमिति।
डॉ. आंबेडकरमहोदयैः स्वभूमिका स्पष्टीकृता।
यद्यपि भवद्भिः मह्यं समीपस्थदीपस्तंभे समारोप्य वधदण्डः दीयते तथापि मम बान्धवानां नियमबद्धा-धिकारविषये मया अप्रामाणिकता नैव क्रियते।
ततः तैः येरवडाकारागृहे म॰ गान्धिदर्शनं गृहीतम्।
वयं सर्वे अविभक्ततया एकतया च जीवाम। स्वेच्छया भूतकालीन-पापक्षालनार्थं हिन्दुधर्माय अन्तिमसन्धिः देयः।
अहं विचारं कृत्वा कथयामि।


एतस्मिन् महत्समस्याप्रसंगे मार्गः न दृश्यते स्म। अन्ते विभक्तमतदातृसंघस्थाने अस्पृश्यानां कृते अधिकं प्रतिनिधित्वं देयमिति सन्धियुक्तस्वीकरणे स्वाक्षरीदानार्थं डॉ. आंबेडकरैः मान्यता प्रदर्शिता।
जातितत्त्वानुसारं जनानां भूयमानविभाजनम् अन्ते परिहृतम्।
राजकारणे क्रियाशीलः अपि तेषां विद्याव्यासंगः अचलदेव। तेषामपूर्वग्रन्थागारे तैः पञ्चसहस्रतः अधिक-ग्रन्थानां संग्रहः कृतः। एतदर्थं उत्तर मुंबई दादर इत्यत्र तैः सुयोग्यबृहद्गृहं रचितम्। तस्याधुना राजगृहमिति नामधेयं कृतं वर्तते।
१९३५ ख्रिस्ताब्दे मे मासे आंबेडकराणां जीवने एका दुःखदा घटना घटिता। तेषां प्रियपत्नी रमाबाई दिवं गता।
मध्यकाले पुणेसन्धिः केवलं कागजोपरि स्थितः इति ज्ञात्वा डॉ. आंबेडकराः व्यथिताः जाताः। येवले इत्यत्र अस्पृश्यानां समाहूतपरिषदि-
मानवतायाः सरलाः अधिकाराः अपि अस्माभिः नाधिगताः। अहं हिन्दुः इति जन्म गृहीतवान्। नायं ममापराधः। मरणसमये तु अहं हिन्दुः इति स्थित्वा न म्रिये इत्येतदेव मया सुनिश्चयेन कथ्यते भवद्भ्यः।


महार इति अस्पृश्यसमाजस्य परिषदि भाषणसमये।
" यः धर्मः भवतः मानवान् इति नैव जानाति।.. यः च अज्ञानिनः मत्वा अज्ञानिनः, दरिद्रान् मत्वा दरिद्रान् एव च स्थापयति निर्दयतया इति सः धर्मः नास्ति सः तु महती पीडा एव।"
भारतीय शासनस्य १९३५ वर्षस्य विधिनियमानुसारं प्रथम निर्वाचनं समारब्धम्।
अस्माकं नूतन पक्षद्वारा स्वतन्त्रमजूरपक्ष - द्वारा अहं भवतः आह्वयामि।
स्वतन्त्र-मजूर-पक्षस्य डॉ. आंबेडकराः अन्ये चतुर्दशजनाः मुंबई विधान सभायां निर्वाचिताः अभवन्।
१९३९ वर्षे द्वितीयमहायुद्धं प्रारब्धम्। कॉंग्रेस-मंत्रिमण्डलेन त्यागपत्राणि दत्तानि। १९४२ वर्षस्य जुलै मासे व्हाईसरायेण स्वकार्यकारिपरिषदि मजूर मन्त्रित्वेन डॉ. आंबेडकराणां नियुक्तिः कृता। तेषां गौरवार्थं संपन्नसमारोहे...
मम जन्म दरिद्रपरिवारे, तत्रैव मम वृद्धिः च जाता। तेषु च मम स्थितिरपि। जीर्णशीर्णास्तरणे मम विश्रामादिकम्। तेषां सर्वदुःखानि काठिन्यानि च स्वयमनुभूतानि। अनया नवाधिकारप्राप्त्या मम मित्राणाम् अन्यजनानां विषये च ममाचरणे कापि न्यूनता न भवेत्।
१९४२ वर्षे तैः "ऑल इंडिया शेडयूल्डकास्टस फेडरेशन" इत्यस्याः स्थापना कृता। बहुपरिश्रमैः अपि सप्टेंबर १९४५ मध्ये सार्वत्रिक निर्वाचने तेषां पक्षेण अपयशः प्राप्तम्।


१९४६ ख्रिस्ताब्दे डॉ. आंबेडकराः संविधाननिर्माणसमित्यां निर्वाचिताः अभवन्। प्रथमभाषणे तेषां महामनसः पुनर्दर्शनं जातम्।
'यद्यपि अस्मासु जाति-संप्रदायभेदाः बहवः तथापि वयमेक-शक्त्याः भवामः इत्यत्र मे मनसि न सन्देहलेशः।
संविधान समित्याः तृतीयाधिवेशने अस्पृश्यता-पालनं नाम अपराधः इति प्रस्तावः संमतः।
ऑगस्ट १९४७ मध्ये यदा भारतदेशः स्वतन्त्रः जातः तदा डॉ. आंबेडकराः स्वतन्त्रभारतस्य प्रथम-न्यायविधिमन्त्रिपदे नियुक्ताः।
कियानयमपूर्वसंमानः! एतैः महापुरुषैः स्वसमाजार्थं नूनमेव संमानश्रेणी साध्यते।
संविधानरचनार्थं समितिः नियुक्ता। तस्याः अध्यक्षपदे डॉ. आंबेडकराः। जगति च महत्तम-प्रजातन्त्रसंविधानसिद्धीकरणस्य उत्तरदायित्वं एतेषामेव।
संविधानरचनारेखाङ्कनं पूर्णतां गमनान्ते डॉ. आंबेडकराः रुग्णाः। मुंबईस्थरुग्णालये डॉ. शारदाकबीर इत्यनया सह तेषां समागमः अभवत्।
एप्रिल १९४८ वर्षे तैः डॉ. शारदया सह विवाहः कृतः


४ नोव्हेंबर १९४८ ख्रिस्ताब्दे डॉ. आंबेडकरैः संविधानसमित्यै संविधानरेखाङ्कनं समर्पितम् यैः जातिभेदैः समाजजीवनं विभाजितं । कृतम्
जातिजातिषु च मत्सरः, तिरस्कारः च समुत्पादितौ इति तं जातिभेदं त्यक्त्वा भारतीयाः एकराष्ट्रियाः भवन्तु इति मम आह्वानमस्ति ।
२६ नोव्हेंबर १९४९ ख्रिस्ताब्दे संविधानसमित्या भारतीयजनप्रातिनिधित्वेन संविधानं स्वीकृतम्।
श्रीलङ्कादेशे समाहूत बौद्धपरिषदि डॉ. आंबेडकराः निमन्त्रिताः। ततः प्रत्यागमनान्ते तैः मुंबईस्थबुद्ध मन्दिरे भाषणं कृतम् ।
अस्माकं त्रस्तता यदि समापनीया इति मन्यते ततः जनैः बौद्धधर्मः स्वीकार्यः। भारते बौद्धधर्मस्य पुनरुज्जीवनं तस्य च प्रसारणं भवतु। एतदर्थं मया मम उर्वरित-जीवनं व्ययीक्रियते।
अग्रिम-अष्टवर्षेषु सामाजिक-अन्यायविरोधे, निरर्थकधार्मिकरूढिविरोधे च तीव्राः संघर्षाः करणीयाः। १४ आक्टोबर १९५६ ख्रिस्ताब्दे नागपुरे डॉ. आंबेडकरैः बौद्धधर्मः स्वीकृतः।


ततः त्रिलक्षतः अधिक-अनुयायिनां महाजनसागराय
तैः बौद्धधर्मस्य दीक्षा दत्ता।
बुद्धं सरणं गच्छामि।
बुद्धं सरणं गच्छामि
सप्तसप्ताहानन्तरं ६ डिसेंबर १९५६ तमे दिनाङ्के दिल्लीस्थ-निवासस्थाने डॉ. आंबेडकराः
दिवं गताः। द्वितीये दिने तेषां शवः मुंबई इत्यत्र आनीतः। तेषाम् अन्त्ययात्रा द्विक्रोशार्धा
दीर्घा आसीत्। एतादृशी अन्त्ययात्रा मुंबईनगर्यां कदापि पूर्वं न दृष्टा स्यात्।
दादर इत्यत्र श्मशानभूमौ तत्सायंकाले महनीयैः नेतृभिः बाबासाहेबमहाशयेभ्यः अन्तिमः
श्रद्धाञ्जलिः समर्पितः। बौद्धधर्मानुसारम् अन्त्यसंस्कारान्ते चिता प्रज्ज्वालिता कृता। भारतमातुः
दलितबाल-बालिकार्थं यैः शौर्येण आमरणं संघर्षः कृतः इति एते महान्तः सुपुत्राः विश्रान्ताः अभवन्।

श्रद्धाञ्जलिः



अहं मन्ये यत् हिन्दुसमाजे सर्वात्याचारि-प्रवृत्तिविरोधे प्रक्षोभं कुर्वाणाः इति डॉ. आंबेडकराः प्रामुख्येन संस्मरणे तिष्ठन्ति । तैः यद्यद्विषय-विरोधे प्रक्षोभः कृतः तत्तद्विषयविरोधे प्रक्षोभः करणीयः आसीत् तथा अस्माभिः अंशतः कृतः अपि । तेषां मतानुसारम् अस्माकं मतानि न स्युरपि निःसंशयं मया कथ्यते-यत् तेषां हठाग्रहः अखण्डित-प्रयत्नाः, समर्थः विरोधः च इत्ये तैः जनमनांसि-जागृतिमयानि स्थापितानि । अविस्मरणीय घटनाः प्रति दुर्लक्षीकर्तुं तेषाम् असमर्थता अभवत् । तथैव परंपरागतदुःखभोक्तृषु अपि अनेन नवचैतन्यनिर्मितिः अपि अभवत् ।

पंडित जवाहरलाल नेहरु : ।

डॉ. आंबेडकराः अस्माकं संविधानस्य शिल्पकाराः सन्ति । तथैव च तेषां बहुविध-क्षेत्रीयसेवा विशेषतः दलितोद्धारार्थं कृतं कार्यं च अतिमहनीयं वर्तते ।

– डॉ. राजेन्द्र प्रसादः ।

डॉ. आंबेडकराः अत्यन्त प्रामाणिकाः गृहस्थाः आसन् । ते कुशाग्र-न्याय-शास्त्रतज्ज्ञाः अभिमानिनः, दृढनिश्चयिनः च स्वभावतः एव आसन् । ते प्रगल्भ-विद्वांसः, सरलमनसा दर्शनिकर्तृभिः सह दृढस्नेहेन समाचरन्ति स्म ।

– राज गोपालाचारी

देशस्थ-सामाजिकजीवन-पद्धत्यां परिवर्तनं घटयमाने सति तद्वर्ष गतिदातृषु डॉ. आंबेडकराः अनन्यलभाः असाधारणाः चासन् । एतेषां परिवर्तनानां महत्त्वम् एतादृशमासीत् यत् एतैः लक्षशः जनानां जीवनम् अधिकं सुन्दरं सुखदं च भविष्यति एव ।

– उ. नु. ब्रह्मदेशस्य प्रधानमन्त्री ।

On public demand, the best 50 Amar Chitra Katha titles are now being brought out in Deluxe Editions.



Titles published

501 – Krishna
502 – Hanuman
503 – The sons of Rama
504 – Rama
505 – The Gita
506 – Shiva Parvati
507 – Nala Damayanti
508 – Chanakya
509 – Ganesha
510 – Buddha
511 – Savitri
512 – Tales of Vishnu
513 – Hanuman to the rescue
514 – Tales of Durga
515 – Ganga
516 – Krishna and Rukmini
517 – Vivekananda
518 – Krishna and Jarasandha
519 – Elephanta
520 – Tales of Narada
521 – Angulimala
522 – Krishna and Narakasura
523 – Raman of Tenali
524 – Indra and Shibi
525 – Tales of Arjuna
526 – Mahiravana
527 – Bheema and Hanuman
528 – Kumbhakarna
529 – Kartikeya
530 – Shakuntala
531 – Karna
532 – Sudama
533 – Abhimanyu
534 – Bheeshma
535 – Mirabai
536 – Ashoka
537 – Prahlad
538 – The churning of the ocean
539 – Rani of Jhansi
540 – Panchatantra – Jackal and the War Drum
541 – The Lord of Lanka
542 – Draupadi
543 – Jataka Tales – Monkey stories
544 – Subhas Chandra Bose
545 – Birbal the wise
546 – Vali
547 – Garuda
548 – Rabindranath Tagore
549 – Tales of Shiva
550 – Sati & Shiva

Price Rs. 15 each

AMAR CHITRA KATHA

Did you know

- **Over 78 million copies of Amar Chitra Katha have been sold so far?**
- **A few titles have been brought out in 38 languages of the world?**
- **436 titles have been printed so far?**

IBH

Published by :
India Book House Pvt. Ltd